# न्यायदर्शनदृष्ट्या ईश्वरनिरूपणम्

तुलसीपौडेलः
उपप्राध्यापकः-प्राचीनन्यायः
नेपालसंस्कृतविश्वविद्यालयः - पिण्डेश्वरविद्यापीठम्, धरानः
shubharahos@gmail.com

**लेखसारः**

प्रस्तुतशोधालेखे न्यायदर्शनाभिमत ईश्वरो निरूपितो वर्तते । आस्तिकनास्तिकभेदेन पौरस्त्यदर्शनस्य द्विविधो भेदो दृश्यते । तयोर्न्यायदर्शनमास्तिकदर्शनमस्ति । इदं वेदप्रमाणमङ्गीकारात् वैदिकदर्शनमस्ति । न्यायदर्शने विशेषत अनुमानप्रमाणेन ईश्वरः साधितो वर्तते । अस्मिन् शोधालेखे न्यायदर्शने प्रतिपादितस्य ईश्वरस्य स्वरूपं विचार्य ईश्वरस्य सिद्धिः विशेषतः शब्दानुमानप्रमाणाभ्यां कृतो वर्तते । ईश्वरस्य सिद्धिं कृत्वा तस्य यथार्थस्वरूपमपि अस्मिल्लेखे प्रतिपादितं वर्तते । तदनन्तरं निष्कर्षत्वेन समाभूता विषया अस्य शोधालेखस्यान्ते संस्थापिता वर्तन्ते । निष्कर्षश्च न्यायदर्शस्य ईश्वरमधिकृत्य विरचितान् अनेकान् ग्रन्थान् अध्ययनेन संस्थापितो वर्तते । अयं लेख ईश्वरविषये समुद्भूतानां समस्यानां निराकरणे समुत्सुको वर्तते । यथोपलब्धं शोधविधिमाश्रित्य शोधः सम्पन्नः कृतो वर्तते ।

**शब्दकुञ्जी -** ईश्वरः, न्यायदर्शनम्, पौरस्त्यवाङ्ग्यम्, प्रमाणम्, वैदिकसाहित्यम् ।

## विषयपरिचयः

ईश्वरविचारः पौरस्त्यवाङ्ग्यस्यैव मूलविषयो वर्तते । आस्तिकदर्शनस्य प्रधानचिन्तनभूतविषयेषु 'ईश्वरः' सुप्रसिद्धः सुपरिचितश्च विषयो वर्तते । ईश्वरप्रतिपादनमूलकाः सिद्धान्ताः पौरस्त्यदर्शनेषु विख्याताः एव । वेदान्ते च अद्वैतद्वैतविशिष्टाद्वैतादिषु ईश्वरस्य स्थानं प्रधानतमं विद्यते एव । वेदमूलकेषु आस्तिकषड्दर्शनेषु प्रायः सर्वाणि दर्शनानि ईश्वरं निरूपयन्ति । तथापि वेदमूलकत्वेन परिचितापि साङ्ख्यमीमांसादार्शनिकैः ईश्वरसत्ता नैवङ्गीक्रियते । चार्वाकबौद्धजैनैः कतैपयैश्च ईश्वरो खण्डितः कृतो वर्तते । पौरस्त्यदर्शनसम्प्रदायाद् बहिरपि वैदिकसाहित्ये, ईतिहासपुराणादिषु च ईश्वरः सर्वतिशयेन प्रतिपादितो दृश्यते । उपनिषत्सु ईश्वरस्य वाचकत्वेन ईश्वरशब्दस्यातिरिक्तं विशेषतो देवशब्दस्य प्रयोगो विहितो वर्तते (श्वेताश्वतरोपनिषद् ,५।१३ ) । पुराणादिषु च पुरषोत्तमः परमात्मा, भगवान्नादिशब्दा ईश्वरवाचका वर्तन्ते (श्रीमद्भागवतम्, १।२।११) ।

तदतिरिक्तं पर्यायतया अन्येषां वासुदेवादिकतिपयशब्दानामपि पुराणसाहित्ये प्रयोगः कृतो दृश्यते । वैदिकसाहित्ये ईश्वरं लक्षीकृत्य एकदेववादस्य, बहुदेववादचिन्तनस्य च विस्तृता विवेचना वर्तते । स एव देवः वेदेषु विष्णुदेवता, ईन्द्रदेवता, रुद्रदेवता, वरुणदेवता, सूर्यदेवता, इत्यादिशब्दैर्व्यवह्रयते । तस्य कृते वैदिकसाहित्ये स्तुतिमन्त्राः प्राप्यन्ते । तत्रापि कतिपयैश्च एकदेवमतं स्वीक्रियते, कतिपयैश्च बहुदेवमतम् । वैदिकसाहित्ये, इतिहासपुराणेषु च प्रतिपादितः स एव ईश्वरो न्यायदर्शने कीदृशः कया विधया च प्रतिपादितो वर्तत इति विचारयामः । ईश्वरशब्दस्य व्युत्पत्तिः सिद्धिश्च – ऐश्वर्यार्थकात् ईशधातोः वरच् प्रत्यये कृते सति भवति । तथा सिद्धस्य ईश्वरशब्दस्य बहव अर्थाः समुपलभ्यन्ते । तेषु च महादेवः,परमात्मा, भगवान्, स्वामी, प्रभुः, नियन्तादयो विशेषाः दृश्यन्ते । स एव ईश्वरः न्यायमते चेतनो नित्यज्ञानाश्रयवान् सर्वव्यापी स्वीकृतो वर्तते । वेदान्ते च स परमात्मा एव सर्वस्य जगतः कारणभूतरूपेण प्रतिपादितं दृश्यते (श्वेताश्वतरोपनिषद् ६।१५ ) श्रीमद्भगवद्गीतायां परमात्मा सर्वजनहृदि सन्निविष्टः, पुरुषोत्तमशब्दैर्वाच्य इति प्रतिपादितो वर्तते ( श्रीमद्भगववद्गीता अ.१५। श्लो.१५।१९) । न्यायसूत्रे पुरुषकर्मणो वैफल्यदर्शनात् फलोत्पत्त्यानुकुलव्यापारेच्छा ईश्वरे वर्तत इति प्रतिपादितो वर्तते ( न्यायसूत्रम्, ४।१।१९) । अनेन च ज्ञायते कस्यापि कर्मणः फलोत्पादने ईश्वरेच्छाकारणं भवतीति । योगदर्शने च अविद्यादिपञ्चक्लेशैः कर्मफलवासनादिभिश्च सदैव असंष्पृष्टः ईश्वरो भवतीति व्युत्पादितं दृश्यते ( योगसूत्रम्, १।२४) । योगदर्शने समाधिलाभःसमाधिफलश्च ईश्वरस्यैव प्राणिधानाद् भवतीति मन्यते । तत्रैवोक्तं यत् निरतिशयसर्वज्ञत्वं ईश्वरे एव भवतीति । सर्गादौ स एव उपदिशति अतः स आदिगुरुः कथ्यते । सः कालविभागारहितः सदेकाकाररूपः । न्यायदर्शने प्रथमं जीवात्मा परमात्मा चेति आत्मनो द्विविधो भेदो दृश्यते । तत्र जीवात्मनि वर्तमानाः ज्ञानेच्छाप्रयत्नगुणाः अनित्याः । परमात्मनि च ते गुणा नित्या भवन्ति । न्यायदर्शने वेदोपदेशकत्वेनापि ईश्वरः प्रतिपाद्यते । योगदर्शनेऽपि वेदोपदेशकः ईश्वर एव मन्यते । वेदान्तेषु च ईश्वरः सगुणः निर्गुण इति द्विविधैव प्रतिपाद्यते । वेदान्तेषु निमित्तोपादनकारणं ईश्वरो मन्यते । अद्वैतवेदान्ते जीवात्मपरमात्मनोरभेदश्च मन्यते । तथा च न्यायवैशेषिके वैष्णवशैववेदान्तेषु जीवपरमात्मनो भेदः प्रतिपाद्यते । एतावता विषयपरिचयत्वेन ईश्वरस्य परिचयः प्रस्तुतः । तेन च ज्ञायते ईश्वरस्य निरूपणाय नैकानि मतानि प्रचलितानि सन्ति । तत्र पौरस्त्यदर्शनेष्वपि पृथक् पृथक् विधया ईश्वरो निरूपितो वर्तते । तथा च ईश्वर एकः सन्नपि तस्य प्रतिपादने दर्शनजगति मतानि बहुनि दृश्यन्ते । पौरस्त्यदर्शने अपि तत्र नास्तिकमतावलम्बिनो बौद्धजैनचार्वाकाः ईश्वरं नाङ्गीकुर्वन्ति । कुत्रचित् च ईश्वरस्यैव खण्डनं प्रचुरगत्या कृतो दृश्यते । कुत्रचित् ईश्वरविषये मौनतापि अवलोकितो वर्तते । मीमांसकैः साङ्ख्यैश्च ईश्वरप्रतिपादने रूचिः नावलोक्यते ।

न्यायदर्शने न्यायकुशुमाञ्जल्यादिग्रन्थेषु ईश्वरस्य चर्चा अतीव गभीरतया कृता वर्तते । उक्तमेव उपरि पौरस्त्यदर्शने ईश्वरस्य चिन्तनं गाम्भिर्येण विहितं विद्यते । प्रतिदर्शनं तस्य वैविध्यं स्पष्टमवलोक्यते ।

ईश्वरविषयकानि शोधानुसन्धानानि बहुभिः कृतानि दृश्यन्ते । तथा च श्रीमता श्रीपादशास्त्रीहसुरकरेण ईश्वरः भक्तानुग्राहकः अवतारधारकः इति प्रतिपादितं वर्तते (द्वादशदर्शनसोपानवलिः, पृ.११०) । परन्तु तत्र तै ईश्वरविषये अन्यत् न किमपि प्रतिपादितम् । तथा च डा० रमाशङ्करत्रिपाठीवर्येण ईश्वरसाधनाय सृष्टिविज्ञानादयो नव तर्काः प्रस्तुताः दृश्यन्ते । वस्तुतः ते तर्काः न्यायकुशुमाञ्जलिग्रन्थतः समुधृताः दृश्यन्ते (भारतीय दर्शनका परिशीलन, पृ.२०७) । श्रीमता उमेशमिश्रमहोदयेन च सर्वेऽपि मानवाः कथञ्चन केनाऽपि स्वरूपेण वा ईश्वरं निरूपयन्ति एव । अतः न्यायवैशेषिकयोरपि सर्वगुणसम्पन्नः कर्ता ईश्वरो भवतीति प्रतिपादितम् ( भारतीय दर्शन, पृ.२२४) । ईश्वरविषयमधिकृत्याधुनिके अन्यैरपि कतिपयैः पौरस्त्यदार्शनिकैः शोधानुसन्धानं कृतम् । तेषु श्रीमतीबीनाश्रीवास्तवमहोदया अतीव गहनतया भारतीयदर्शने ईश्वरविचारः इति नाम्ना हिन्दीभाषायां काशीहिन्दुविश्वविद्यालयतः ई.१९८२ तमे वर्षे अनुसन्धानं कृतवती । परन्तु तत्र ईश्वरस्य विवेचनं सामान्यरूपेण कृतं दृश्यते । तैः तर्काः प्रमाणानि च नैव प्रदर्शितानि । विषयविवेचने न्यूनता अवलोक्यते । तथा च तानि सर्वाणि कार्याणि नवीनान्येव अनुभूयन्ते । तत्सम्बन्धिविषयाश्च सदैव रूचिकराः नूतनविषयानुभावकाश्च भवन्ति इति पूर्वाचार्यैः भक्तिपरायणैश्चोपदिष्टा । परमात्मतत्वं सदैव रम्यं नवं नवं रूचिकरं च भवतीति भक्तिदर्शने उद्घोषितमपि । ईश्वरमधिकृत्य प्रतिपादितान् विषयान् समादायैव इदं शोधालेखनं प्रारभ्यते । न्यायमतानुसारं तस्य प्रतिपादनं विधीयते । प्रतिपादनकाले अन्येषु दर्शनेषु प्रतिपादितानि तत्संबन्धिमतान्यपि समालोच्य निष्कर्षः आनीयते ।

## समस्याकथनम्

द्वे समस्ये समुथ्थाप्य शोधलेखनकार्यारम्भो वर्तते । ते चाधो निर्दिष्यते –

न्यायदर्शनानुसारेण ईश्वरस्य स्वरूपं कीदृशं प्रतिपाद्यते ?

न्यायदर्शने ईश्वरः केन प्रमाणेन साध्यते ?

## उद्देश्यम्

अध्ययनं द्वे उद्देश्ये सङ्गृह्य प्रारम्भः कृतो वर्तते । ते चाधः निर्दिश्येते –

न्यायदर्शनानुसारेण ईश्वरस्वरूपप्रतिपादनम् ।

ईश्वरप्रतिपादने प्रस्तूतानां प्रमाणानां निदर्शनम् ।

## अध्ययनविधिः सीमा च

अस्यानुसन्धानालेखस्य कृते दर्शनविषयाध्ययनसहयोगित्वेन उपलब्धाः विविधविषयाः स्वीक्रियन्ते । अतोऽनुसन्धानालेखस्य निष्कर्षरूपेण फलप्राप्त्यर्थ पुस्तकलय्याद्यनुसन्धानविधिरवलम्बनीया भवति । अस्य शोधलेखस्य कृते विविधसामग्रीणां संकलनाय पुस्तकालयीयाध्ययनविधिरेव प्रामुख्यं वर्तते । तत्र च प्राच्यदर्शनसम्बन्धविविधग्रन्थाः, ईश्वरविषयकाः संस्कृतमूलाकारग्रन्थाः, प्राथमिकसामग्रीत्वेन स्वीक्रियन्ते। तदतिरिक्तं नैकविधपूर्वीयदर्शनरनुसन्धातृभिः ईश्वरमधिकृत्य कृतान् शोधग्रन्थान् अपि अवलोक्य ततः ईश्वरसम्बद्धा विषयाः द्वितीयसमग्रीत्वेन ग्रहीष्यन्ते । आवश्यकस्थले अस्मिन् शोधालेखे विश्लेषणात्मकविधिः प्रयुज्यते । अस्य लेखस्य कृते ईश्वरसम्बद्धा ग्रन्था आलेखादयः सीमारूपेण निर्धारिता भवन्ति ।

## सैद्धान्तिकः पर्याधारः

ईश्वरतत्त्वं न्यायदर्शनस्य महत्त्वपूर्णो विषयो विद्यते । ईश्वरस्य स्वरूपम्, तस्य साधने च अङ्गीकृतानां प्रमाणानां न्यायशास्त्रेषु प्रतिपादितमस्ति । तान्येव शास्त्राणि अस्य लेखस्य आधारभूतानि क्षेत्राणि भवन्ति । तथा च शास्त्रविद्भिः समुल्लिखिताः लेखरचनाश्चापि पर्यालोचने आधारभूता भवन्ति ।

## विषयविश्लेषणम्

### न्यायदर्शन ईश्वरस्वरूपविचारः

न्यायमते ईश्वरस्य स्वरूपं कीदृशमिति अस्य लेखस्य उद्देश्यमस्ति । तदधिकृत्यैवाधुना शोधकार्यर्थं प्रवृत्तोऽहम् । न्यायदर्शनमूलभूतानां ग्रन्थानामवलोकनेन ज्ञायते यत् अस्य स्वरूपं नित्यज्ञानाश्रयत्वमिति । परन्तु इदमेवास्य स्वरूपं वर्तते इति तु वक्तुं न शक्यते । एवञ्च सर्वज्ञः सर्वव्यापकश्चापि परमात्मनो स्वरूपं न्यायदर्शने प्रतिपाद्यते । तर्कसंग्रहकारेण ज्ञानाश्रयत्वेनैव आत्मनो निरूपणं कृतम् (तर्कसंग्रहः पृ.३९) । तत्र आत्मशब्देन जीवात्मा परमात्मा च द्वयोर्भेदः गृहीतो भवति । परमात्माशब्दः ईश्वरवाचको वर्तत इत्युक्तमेव । आत्मनः स्वरूपं तत्र न्यायमुक्तावलिग्रन्थे तावत् इन्द्रियाणामधिष्ठातृत्वं प्रदर्शितम् । परन्तु इन्द्रियाणामधिष्ठातृत्वं परमात्मन्यभावात् ज्ञानाश्रयत्वमेव आत्मनो स्वरूपं प्रदर्शितम् (न्यायसिद्धान्तमुक्तावली पृ.२१०) नित्यज्ञानाश्रयत्वेन ईश्वरनिरूपितेऽपि ज्ञानेश्वरयोः भेदः अत्र स्वीकृतो वर्तते । अद्वैतवदभेदः अस्मिन् दर्शने नाङ्गीक्रियते । श्रीमता जयन्तभट्टेन वेदस्य जगतश्च कर्तृत्वेन ईश्वस्य स्वरूपं निरूपितं दृश्यते (न्यायमञ्जरी, भा.१, पृ.१७५) । जगतः कतृत्त्वेनैव ईश्वरस्य निरूपणं न्यायदर्शने विशेषतः कृतो वर्तते । अस्मिन्नेव दर्शने कर्मफलप्रदाताऽपि ईश्वर एव मन्यते । यतो हि न्यायसूत्रानुसारेण जीवः लोके नानाफलप्राप्तये

विविधकर्म कुर्वन् दृश्यते । तथापि सः स्वाभिप्सितं फलं न प्राप्नोति । फलाभावेन सः क्लिष्टतामनुभवति । तेन ज्ञायते जीवस्य कर्मफलं न तस्याधीनम् । यदि जीवस्याधीनं जीवकृतकर्मफलं स्यात् तर्हि जीवकृतकर्माणि कदापि विफलानि न स्युः । परन्तु जीवेन कृतस्य स्वकर्मणः फलाभावः सर्वैरपि अनुभूयन्ते एव । लोके दृश्यन्ते चाऽपि । तेनानुमीयते यत् कर्मफलप्रदाता अस्मदतिरिक्तः कश्चन सर्वज्ञः वर्तत इति । स एव ईश्वरशब्दाभिधेय इति स्वीकर्तव्यो भवति । अनेन न्यायमतानुसारं कर्मफलप्रदातृत्वं ईश्वरस्य स्वरूपं वक्तव्यमेव भवति (न्यायसूत्रम्,४।१।१९) । तस्मिन् ईश्वरे समयवायसम्वन्धेन गुणाः वर्तन्ते । समवायसम्बन्धश्च नित्यसम्बन्धो वर्तते । अयुतसिद्धयोः सम्बन्ध एव नित्यसम्बन्धो वर्तते । न्यायदर्शने आत्मनो विशेषगुणाः नव स्वीकृता वर्तन्ते । तत्र नवसु विशेषगुणेषु मध्ये केवलं पञ्च विशेषगुणा ईश्वरे वर्तन्ते । ते च गुणाः बुद्धिसुखेच्छाप्रयत्नधर्माश्च ईश्वरे दृश्यन्ते ।

ईश्वरः एव नास्तीति वदन्तान् नास्तिकान् खण्डनाय न्यायवैशेषिकयोः दर्शनयोः जगतः सृष्टिप्रलयाभ्याम्, लौकिकशास्त्रीयव्यवहारेण च च ईश्वरस्यास्तित्वं साद्ध्यते । (वैशेषिकसूत्रम्, १।१।२,–२।१।६१) । ईश्वरसाधनेन वेदानां प्रामाण्यमपि गृहीतो भवति । तथा च च सृष्टिसंहारकतृत्वमपि तस्य स्वरूपमस्तीति ज्ञायते । न्यायदर्शने आचार्यगौतमेन कर्मनिरपेक्षेश्वरकारणवादः निरस्कृतो वर्तते । यदि जीवः शास्त्रविहितानि सत्कर्माणि कुरुते, तस्य कर्मणः फलान्यपि समीचीनानि एव दृश्यन्ते । जीवः स्वकृतकर्मानुसारं सुखदुःखानुभवं करोति । न्यायसूत्रकारगौतमेन एवमेव ईश्वरो विविच्यते । अस्मिन् प्रसङ्गे एवमपि विचारयामः, यदि कर्मानपेक्षं फलं सः प्रदेयात् तदा, तदानीं वा सर्वेषां कथमपि कर्मकुवतां नराणां स्वतः स्वाभाविकं फलप्राप्तिः स्यादेव । एवमपि कर्मविहीनैः जनैरपि फलभोगः कृतो दृश्येत । एवञ्च बहुकालसाध्ये कठिनकर्मकरणे जनानां प्रवृत्तिरपि न भवेत् । परन्तु लोके तथा कर्मविना वा फलप्राप्तिः नानुभूयते । अपितु कर्मकृते सति फलप्राप्तेराशाः हृदये सुपल्लविता भवतीति दृश्यते । न्यायमतानुसारेण ईश्वरस्यास्तित्त्वं शुभाशुभफलप्रदातृत्वेन, जगतो निमित्तकारणत्वेनापि सिद्ध्यति । आचार्यैः एवंविधिना ईश्वरः परिगृहीतो वर्तते । यदि ईश्वरः जीवस्य कर्मफलगतधर्माधर्मान् अगृहीत्वैव सृष्टिं करोति यदि मन्यते चेत् तदानीं ईश्वरे स्वेच्छाचारित्वम्, निर्दयीत्वम्, पक्षपातीत्वादिदोषाः आपतन्ति । अतः न्याये अदृष्टविशेषेऽपि ईश्वरः एव स्वीक्रियते । अतः सः सर्वस्य कर्मफलप्रदाताऽस्ति । तेनैव सह जगतो निमित्तकारणमपि वर्तते । अनेन बोध्यते कर्मफलप्रदातृत्वं जगतो निमित्तकारणत्वञ्चेश्वरस्य स्वरूपमस्तीति बोध्यते । जीवगतकर्मणः साहाय्येन ईश्वरः परमाणुषु क्रियां जनयति । ततः एव स सर्वाणि कार्याणि जनयति । जगतो

निमित्तकारणता ईश्वरे कथं सम्भवतीति तस्यैव प्रामाण्ये संशयो वर्तते इति आक्षेप्यते चेदपि ईश्वरस्य निमित्तकारणे न कोऽपि अवरोधः ।

**ईश्वरस्यस्तित्त्वविचारः**

यतो हि न्याये ईश्वरसाधने सर्वाणि प्रमाणानि प्रवृत्तानि वर्तन्ते, प्रमाणविषये प्रमाणनिरूपणप्रसङ्गे अग्रे वर्ण्यते एव । अत्र च प्रत्यक्षानुमानोपमानशब्दैः ईश्वरः सिद्धो वर्तते चेत् तस्याप्रामाण्यविषयकी दुरुक्तिरपि स्वतः एव व्यपगच्छति । तथा च येन प्रमाणेन ईश्वरसत्ता साधिता तेनैव प्रमाणेन तस्य निमित्तकारणत्वमपि साधितं भवतीति उद्योतकरैः प्रतिपादितोऽपि दृश्यते इति अत्र कथनीयमेव भवतीति (न्यायभाष्यवार्तिकम्, ४।१।२१) । तथा च अन्याऽपि एका युक्ति उद्योतकरेण प्रस्तुता वर्तते यथा – चेतनस्याधिष्ठानं विना अतीन्द्रियवस्तुनि क्रियाव्यवहारो न दृश्यते, यथा छेदजनकं विना छेदकवस्तुना मात्रेण छेदनरूपा क्रिया न सम्भवति, तथैव अतीन्द्रियेषु वस्तुषु क्रियाऽपि कमपि क्रियाजनकं विना न सम्भवति । परन्तु अस्मद्दृशैः पुरुषैः तत्र अतीन्द्रियवस्तुषु क्रियोत्पादनं न कदाचित् सम्भवति एव । अतः तत्र अतीन्द्रियवस्तुषु क्रियोत्पादनाय अस्मद्भिनसर्वज्ञस्य पुरुषस्य अपेक्षा भवति । स एव पुरुषः ईश्वरः शब्दवाच्यो भवति । स एव ईश्वरशब्दोक्तः पदार्थः दर्शनेऽस्मिन् दृश्यमानस्यास्य जगतो निमित्तकारणत्वेन प्रतिपदितो वर्तते (न्यायभाष्यवार्तिकम्, ४।१।२१) । किं बहुना अचेतनेषु परमाणुष्वपि क्रियादर्शनात् अनुमीयते तत्र क्रियाजनकः कर्ता चेतनविशिष्टः सर्वज्ञश्च ईश्वरो भवति । वस्तुतः स एव ईश्वरः परमाणुषु क्रियां जनयन् जगतः सृष्टिं करोति । तस्य कृते सकलजगद्विधाता, महेश्वरः, भगवानेत्यादिः शब्दा दर्शनेऽस्मिन् प्रयुक्ताः दृश्यन्ते (स्वामी योगीन्द्रानन्दः, पृ. ४४७) । ईश्वरस्यास्तित्वविषये अन्यापि एका युक्तिः प्रसिद्धाः वर्तते । प्रथमञ्च तत्र नास्तिकानां मतं समुपस्थापनीयं दृश्यते । नास्तिकैः दार्शनिकैरपि कतिपयैः स्वमतं प्रतिपाद्यमानै उक्तं वर्तते यत् – यदि क्रियया युक्तः कर्ता भवति चेदेव किमपि नूतनं कार्यं जायते । लोके कर्ता सदैव क्रियायुक्तो दृश्यते । क्रियया विना कर्ता नोपलभ्यते एव । यथा घटरूपकार्यस्य कृते कुम्भकारः क्रियायुक्तो भवति । अत ईश्वरोऽपि किमपि कार्यं जनयति चेत् तत्र ईश्वरे कापि क्रिया आवश्यकी एव । परन्तु संसारकर्तीर ईश्वरे क्रियासत्ता नानुभूयते । ईश्वरे क्रिया न भवतीति विवेचनं नास्तिकै एवं कृतो दृश्यते– यतो हि क्रियाशब्दस्य बहुष्वर्थेषु परिस्पन्दनमित्यर्थ तैरुच्यते । लोके परिस्पन्दनञ्च मूर्तद्रव्येषु एवोपलभ्यते । मूर्तद्रव्याणि च पृथिवीजलतेजोवायुमनांसि सन्ति । आत्मा मूर्तद्रव्येषु नैव गण्यते । मूर्तद्रव्यत्वाभावात् आत्मनि परिस्पन्दाभावोऽपि वर्तत इति स्वीकरणात् तैः साधितुं प्रयत्यते यत् ईश्वर अस्य जगत्कर्ता भवितुं न शक्नोति इति । परन्त्वयं कुतर्क एव । तथा साधयितुं न शक्यते एव । अयञ्च विशेषतः साङ्ख्यमतानुयाभिः

समुत्थापितः कुतर्क एव । एतादृशं कुतर्कं नैयायिकाः सम्यक् समालोच्य तिरस्कुर्वन्ति । सांङ्ख्यादीनां कुतर्काणां समाधानात्मकं समुत्तरं नैयायिकैः प्रदीयते यथा च – दर्शनेऽस्मिन् क्रियाशब्दस्य बहुष्वर्थेषु उत्क्षेपणादयः पञ्च कर्माणि गृह्यन्ते (तर्कसंग्रहः, पृ.१६) । तथैव क्रियाशब्देनैव धात्वर्थस्यापि ग्रहणं भवति । यदि अत्र आक्षेपस्थापकानामभिप्रायः परिस्पदने वर्तते चेदपि तस्य समाधानं एवंविधया भवति । न्याये परिस्पन्दनमपि आख्यातार्थो भवति । यदि आख्यातार्थः परिस्पन्दनरूपक्रिया ईश्वरे न सम्भवतीति तेषामभिप्रायो वर्तते चेत् सः सर्वथानुचित एव । यतो हि प्रतिक्रियासु आत्मनः साक्षात् सम्वन्धो भवति । ज्ञानचिकीर्षाप्रयत्नानि आख्यातवाचकानि भवन्ति । तानि च ईश्वरे नित्यसम्बन्धेन वर्तन्ते एव । अनया युक्त्या नास्तिकानामाक्षेपस्य परिहारो भवति एव । तादृश ईश्वरः सर्वेषां योजको भवति, परन्तु न कैरपि योज्यः । तेन ईश्वरे कारणत्वादयो गुणाः सर्वदा वरिवर्तन्ते इति । अनेन ईश्वरस्य जगद्कतृत्वं सिद्ध्यति । (न्यायभाष्यवार्तिकम्,४।१।२१।) । अनेनैव तस्य सत्तापि सिद्ध्यति एव ।

**ईश्वरसाधनम्**

***क. प्रत्यक्षप्रमाणेन***

न्यायदर्शने ईश्वरस्य ज्ञानं प्रत्यक्षप्रमाणद्वाराऽपि भवतीति निरूप्यते । परन्तु बाह्येन्द्रियैः तस्य प्रत्यक्षज्ञानं न भवति । बाह्येन्द्रियेभ्यो बाह्यविषयज्ञानं लौकिकैः सन्निकर्षैर्भवतीति । ते च लौकिकसन्निकर्षाः षड्विधाः भवन्ति (न्यायसिद्धान्तमुक्तावली, कारिका ५९) । बाह्यविषयाभावात् लौकिकषड्विधैः सन्निकर्षैः तस्य ज्ञानं न सम्भवति । परन्तु न्यायदर्शने अलौकिकैः सन्निकर्षैरीश्वरस्य प्रत्यक्षं भवतीति स्वीकृतो वर्तते । अलौकिकैः सन्निकर्षैश्च अस्मद्भिन्नानां साधकयोगिनां मानसं प्रत्यक्षज्ञानं भवतीति प्रतिपाद्यते । सामान्यलक्षणज्ञानलक्षणयोगजलक्षणैः सन्निकर्षस्य अलौकिकस्य त्रयो भेदाः सन्ति । तेषु योगजलक्षणेन योगिनां ईश्वरज्ञानं प्रत्यक्षं भवतीति प्रतिपादितो दृश्यते । न्यायमञ्जरीकारः कथयति यत्– अनेनैव सन्निकर्षेण योगिभिः भूतकालिकभविष्यत्कालिकानां नानाघटनानां तथा च ईश्वरस्यापि प्रत्यक्षं भवतीति (न्यायमञ्जरी, पृ. ९८) । तथा च योगिजनैः सर्वेऽपि विषयाः प्रत्यक्षीकृताः भवन्ति । मुक्तावलीकारेणापि उच्यते यत् " आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति" (मुक्तावली, पृ. ३४९) इति । निखिलपदार्थ इति कथनेन सर्वेऽपि न्यायसम्मताः पदार्थाः स्वीकार्या भवन्ति । तेन ईश्वरस्य परमात्मनो वा प्रत्यक्षज्ञानं युक्तयुञ्जानाख्यैः योगिभिः सर्वदैव क्रियत इति ।

### *ख. अनुमानप्रमाणेन*

प्रत्यक्षप्रमाणेनापि ईश्वरस्य ज्ञानं तु भवतीति उक्तम् । परन्तु केवलं साधनानुष्ठानरतानामूर्ध्वचेतसां योगिनेव भवति । सामान्यजनैश्च तथाविधिना प्रमाणेन ईश्वरस्यानुभवो न क्रियते । अतो न्यायदर्शने ईश्वर अनुमानप्रमाणेन साध्यते । वस्तुतो ईश्वरस्य कृते दर्शनेऽस्मिन् प्रमाणेषु अनुमानप्रमाणं मुख्यप्रमाणत्वेन स्वीकृतं दृश्यते । अनुमानप्रमाणानन्तरं शब्दप्रमाणस्यापि ईश्वरसाधने प्रयोगः कृतो वर्तते । शब्दप्रमाणस्य वेदान्ते यावत् महत्वं दीयते तावत् महत्वं न्यायदर्शने प्रदत्तमिति नोपलभ्यते । तथापि जयन्तभट्टेन शब्दप्रमाणसन्दर्भे श्रुतिप्रमाणानि बहूनि प्रस्तूतानि दृश्यन्ते (न्यायमञ्जरी,पृ.१६०) । उपरि एवोक्तम् यत् न्यायमते ईश्वरस्य साधने विशेषप्रमाणमनुमानमेव । अत्र च श्रीमदुदयनाचार्येण अनुमानप्रमाणमङ्गीकृत्यैव ईश्वरसाधितं वर्तते । तथा च विश्वनाथप्रभृतिन्यायाचार्यैः परमात्मेश्वरः सुविस्तृतः प्रतिपादितो वर्तते । प्रथमं तावत् अनुमानाकारं जयन्तभट्टेन प्रदर्शितं वर्तते तत् यथा च – पृथिव्यादिकार्यं कर्तृपूर्वकं कार्यत्वात् घटवत् इति (न्यायमञ्जरी, पृ.१७८) । किञ्च मुक्तावलीकारेणापि अनुमानप्रमाणद्वारा ईश्वरसाधितं वर्तते । तेनापि उक्तम् यथा – घटादिकार्यं कर्तृजन्यं तथा क्षित्याङ्कुरादिकार्यमपि कतृजन्यमेव । कर्तृजन्यादिवाक्येन ईश्वरस्य सिद्धिः कृतो वर्तते । ईश्वरसाधकानुमानाकारकेषु प्रस्तुतमिदमनुमानं प्राथमिकम् । व्याप्तिं विना अनुमानं न सम्भवति । अत्र अनुमानप्रमाणे व्याप्तिं प्रदर्श्यते यत् – यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकार्यमपि कर्तृजन्यम् । अथ च यत्र यत्र कार्यत्वम् तत्र तत्र कर्तृजन्यत्वम् इत्यन्ययः । किञ्च 'क्षित्याङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्' इत्यस्मिन् अनुमानाकारके क्षित्याङ्कुरादिः पक्षो वर्तते, तथा च कर्तृजन्यत्वम् साध्यमस्ति । कार्यत्वं हेतुरस्ति । अत्र कार्यत्वहेतुद्वारा कर्तृजन्यत्वं साध्यते । किञ्च अत्र जिज्ञासन्ते कतिपयाः दार्शनिकाः यत् अनेन हेतुना सामान्यकर्तृत्वमेव सिद्ध्यति । अस्मद्भिन्न ईश्वरस्य तेन सिद्धिर्भविष्यतीति किमपि विशेषकारणं तेन नोक्तमिति । परन्तु पूर्वपक्षिभिः संस्थापितो वादोऽयं नैवोचितः । ईश्वरसिद्धिप्रसङ्गे श्रीगंङ्गेशोपाध्यायः सदैव स्मर्तव्यो भवति । तैः स्वीये न्यायकुशुमाञ्जलिग्रन्थे एकस्यां कारिकायामीश्वरसाधकाः युक्तयः संगृहीताः दृश्यन्ते । तत्रोपस्थापिताः पञ्च विप्रत्तिपत्तयः ईश्वरविषयकाः एव । तेन न्यायकुशुमाञ्जलिग्रन्थः एव ईश्वरनिरूपणाय प्रणीतो वर्तते इति ज्ञायते च । तत्र ईश्वरस्य साधनाय नैका उक्तयः प्रदर्शिताः । कुशुमाञ्जलिकारस्य कारिका ईश्वरसाधने न केवलं न्यायदर्शने वस्तुतः पौरस्त्यदर्शनेऽपि च अतीव विख्याता वर्तत इति प्रतीयते । तया कारिकया ईश्वरसिद्धिः सुकरा अभूत् । सा कारिका एवं वर्तते – कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः । वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः । (न्यायकुशुमाञ्जलिः, ५।१) कारिकायां संगृहीतासु युक्तिषु प्रथमा युक्तिः कार्यत्वमस्ति । तत्र

कार्यत्वपदेन भावपदार्थाः ग्राह्याः सन्ति । कार्यत्वसम्बन्धिनी युक्ति उपरि प्रदर्शिता एव । तथा च द्वितीया युक्ति आयोजनमस्ति । आयोज्यते संयोज्यते अनेन इति आयोजनं शब्दस्यार्थः । आयोजनमितिपदेन परमाणुकर्मणो ग्रहणम् । इदमपि पदं भावपरमेव । तथा चानुमानम् –परमाणुकर्म प्रयत्नजन्यं कर्मत्वात् । इत्यनेनापि अनुमानेन ईश्वरः साध्यते । तथैव तृतीया युक्तिः धृतिरस्ति । इयमप्युक्तिः भावपरा एव । तथा च शास्त्रे अनन्तसङ्ख्यानां ब्रह्माण्डानां विषये निरूपणं वर्तते । तेषां ब्रह्मण्डानामधिष्ठाता कश्चनः चेतनः अपेक्षते । तेनापि ईश्वरः साधितो भवति । तस्य कृते चानुमानम् – ब्रह्माण्डधारणं प्रयत्नमिवसंयोगसाध्यं धृतित्वादिति । आदिपदेन विनाशसंहारादिकं कार्यं विवक्षितम् । तस्यापि अनुमानं पूर्ववदेव । तेनापि ईश्वरः साध्यते एव । श्लोकगतपदशब्देनात्र वृद्धादिपुरुषाणां व्यवहारस्य ग्रहणं क्रियते । तस्य व्युत्पत्तिः पद्यते गम्यते अर्थः अनेन इति भवति । तेन च पदार्थव्यवहारः ज्ञायते । अस्य सङ्केतः एवमस्ति यत् – पदद्वारा वस्तुनां सङ्केतः ईश्वरद्वारा एव भवतीति । तथा चानुमानम्– घटादिव्यवहारः स्वतन्त्रपुरुषग्राह्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवदिति । एवञ्च प्रत्ययशब्देन प्रामाण्यार्थः गृह्यते । न्यायमतानुसारं ज्ञानस्य प्रामाण्यं परतो गृह्यते । तथैव ज्ञानस्याप्रामाण्यमपि परत एव गृह्यते । कारणगुणादेव ज्ञानस्य प्रामाण्यं गृह्यते । तथैव अप्रमाण्यमपि कारणगुणादेव गृह्यते । तथा च वेदज्ञानस्य यत् प्रामाण्यं गृह्यते तद्वक्तृप्रामाण्यज्ञानैनैव गृहीतं भवति । तादृशव्यवहारः कारणगुणज्ञानरूपव्यवहार एव । तेन सिद्धयति च वेदस्य कर्ता सर्वज्ञत्वविशिष्टपरमात्मा एव । तथा चानुमानम् –वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात्, प्रत्यक्षादिप्रमावदिति । अनेनापि हेतुना इश्वरस्यैवानुमानं भवतीति । एवञ्च श्रुतिद्वारापि ईश्वरानुमानं भवति । श्रुतिशब्दस्य वेदार्थो वर्तते । तथा चानुमानम् – वेदाः सर्वज्ञप्रणीताः श्रुतित्वादिति । वाक्यद्वारापि ईश्वरानुसन्धानं भवति । वेदः पौरुषेयः वाक्यत्वात् इत्यादिभिः अनुमानवचनैः ईश्वरसिद्धिः क्रियते । तथा च संङ्ख्यापदमपि ईश्वरं साधयति । तस्यानुमानाकारः एवं प्रदर्शितो भवति यथा – परमाणुगतद्वित्वम् अपेक्षावुद्धिजन्यम् अनेकवृत्तिसंख्यात्वात् । तथैव द्व्यणुकगतत्रित्वस्याप्येवानुमातुं शक्यते । श्रीमता उदयनाचार्येण एवं विधया ईश्वरं संसाध्य न्याये तस्य सुदृढं प्रतिष्ठापनं विहितम् ।

***ग. शब्दप्रमाणेन***

एवम् अनुमानानन्तरं शब्दप्रमाणद्वारापि ईश्वरसाधनं न्यायदर्शने विहितं वर्तते । शब्दप्रमाणमित्यनेन आप्तवाक्यं श्रुतिवाक्यञ्च ज्ञायते । आप्तपुरुषै उक्तानि वाक्यानि ईश्वरसिद्धये साधनानि भवन्ति । तथा च ईश्वरसाधनाय श्रुतय अधिका उपलभ्यन्ते एव । श्रुतिषु ईश्वरविषये प्रतिपादनं विस्तृतमुपलभ्यते । तत्रोक्तमस्ति यत् – दिवं भूमिं च एको देवो जनयति । स एव विश्वस्य कर्ता भुवनस्य गोप्ताऽपि अस्ति ।

तथा च समस्तप्राणिहृदये एको देवो वसति । सः एव सर्वभूतान्तरात्मा कार्याधिष्ठाता सर्वस्य द्रष्टा भवतीति । अन्याः श्रुतयोऽपि वर्तन्ते यथा – अणोः अणियान् महतो महियान् सन् वर्तमान उपलभ्यते । एव च गीतोपनिषदि भगवान् स्वयं अर्जुनं उपदिशति यत् – कर्मणो फलदाता, जगतः पितामहश्चाहमेव । इत्यादयः श्रुतयः ईश्वरस्य प्रतिपादनं महता गौरवेन कुर्वन्तीति । तथा च श्रुतौ प्रतिपादितो वर्तते – यत् ईश्वरः अपाणिपादः सन्नपि जवेन ग्रहिता वर्तते, तथैव सः अचक्षुरेव पश्यति, अकर्ण एव श्रृणोतीति ( श्वेता० ३।१९) । श्रुतौ ईश्वरस्य कृते ब्रह्मा, परमात्मा, पुरुषः, अन्तर्यामीत्यादिनि पदानि प्रयुक्तानि वर्तन्ते । तथा च वेदस्यैव व्याख्यानभूतेषु पुराणेषु च शिवः, विष्णुः, पूर्णानन्दः, सच्चिदानन्दः, पुरुषोत्तमादिनि पदानि विहितानि दृश्यन्ते । ईश्वरस्य चिन्तनं आस्तिकदर्शनेषु प्रायः सर्वत्रैव कृतं दृश्यते । कतिपय– वेदान्तेषु प्राथम्येन ईश्वरः शब्दप्रमाणद्वारा साधितो वर्तते । तथा भगवद्गीतायां जीवजगतोः क्षराक्षरशब्दयोः प्रयोगो विहितो वर्तते । तत्र अक्षरशब्देन परमात्मा क्षरशब्देन च जीवात्मा व्युत्पादितो वर्तते । तैश्च पूर्वं श्रुतयः प्रदर्श्यन्ते । तदन्तरं श्रुतिदार्ढ्याय चानुमानं प्रयुज्यते । परन्तु तद्विपरीतं न्यायवैशेषिकदर्शनयोः अनुमानप्रमाणद्वारा ईश्वरसिद्धिः कृतो वर्तते । अनुमानप्रमाणदार्ढ्याय शब्दप्रमाणं प्रयुक्तं दृश्यते । इयमेव प्रक्रियामवलम्ब्य न्यायवैशेषिके न्यायकुशुकमाञ्जलीकारेण पूर्वमनुमानप्रमाणेन ईश्वरं संसाध्य तदनन्तरं शब्दप्रमाणद्वारापि ईश्वरसाधनं विहितं दृश्यते । कुशुमाञ्जल्यां दृश्यते यत् ईश्वरनिरूपणाय विशेषतः उपनिषद्प्रमाणं प्रदर्शितम् । तत्रैव प्रसङ्गे श्रीमदुदयनाचार्येण सर्वाधिष्ठातृत्वेन ईश्वरं निरूपितम् । उदयनाचार्यस्य प्रेरणया तदन्तरवर्तिनो विश्वनाथपञ्चाननादय आचार्या आदौ अनुमानप्रमाणेन ईश्वरसिद्धिं कृत्वा अनन्तरं शब्दप्रमाणेन ईश्वरं साधितवन्तो दृश्यते (न्यायसिद्धान्तमुक्ताली पृ.१५) ।

**निष्कर्षः**

एतावतानुशीलनेन प्रतिपादनेन च ज्ञायते यत् पौरस्यदर्शने सर्वत्र ईश्वरः स्वीक्रितो नास्ति । तत्र नास्तिकदर्शनेषु प्रथमं चार्वाकदर्शने ईश्वरो न स्वीक्रियते । तैश्च स्वीयतन्त्रे ईश्वरत्वेन जगद्प्रशिद्धः शासक उक्तमस्ति । चार्वाकमते प्रत्यक्षातिरिक्ता विषयाः नैवाङ्गीक्रियन्ते । विषयाश्च सर्वेऽपि उत्पन्नविनाशशालिनो मन्यन्ते । ते च सर्वेऽपि प्रत्यक्षा एव । ते एव विषयाः परस्परं सम्मिल्य विषयाः समुत्पादयन्ति । तस्य कृते ईश्वरस्य हेतुत्वं नाङ्गीकृतम् तस्य प्रत्यक्षत्वे प्रमाणाभावात् तस्यास्तित्वं नास्ति एव । तथा बौद्धदर्शनेऽपि ईश्वरः नाङ्गीक्रियते । तत्र सर्वेऽपि विषयाः क्षणिकाः । प्रतित्यसमुत्पादनद्वारा सर्वमपि जगत् सञ्चलति । तस्यैव नियमेन सर्वेऽपि विषयाः प्रकटीभवन्ति । बौद्धदर्शने जगत् क्षणिकमस्ति । तैरुच्यते यत् – तस्य क्षणिकस्य

जगतः कर्ता अविनाशी नित्यो वा भवतीति वक्तुं न शक्यते । जैनदर्शनेऽपि ईश्वरस्य सत्ता नाङ्गीकृतो वर्तते । तस्मिन् आत्मा परिणामस्वभावको भवतीति । तथा च आस्तिकेष्वपि साङ्ख्यमीमांसादर्शनयोः ईश्वरः नैवाङ्कृतो वर्तते । तथा च न्याययोगवेदान्तवैशेषिकेषु एव ईश्वरः प्रतिपादितो वर्तते । योगदर्शने क्लेशकर्मविपाकादिभिः रहितः पुरुषविशेष ईश्वरः स्वीकृतो वर्तते । वेदान्तस्य अनेकसम्प्रदायप्रभेदेन तत्र ईश्वरस्य प्रतिपादनमपि बहुविधेनाभूदिति । अद्वैतवेदान्ते ईश्वर एको निर्गुणः ज्ञानस्वरूपः सर्वव्यापको नित्यश्च प्रतिपादितो वर्तते । जीवात्मपरमात्मनोरभेदः तत्रोक्तमस्ति । तथा च विशिष्टादैतवेदान्ते ईश्वरः सर्वव्यापकः नित्यः अनन्तकल्याणगुणनिधानः जीवपरमात्मनोः विशिष्टाभेदो स्वीकृतो वर्तते । तथा च अन्येष्वपि वेदान्तसम्प्रदायेष्वपि स्वसिद्धान्तानुरोधेन ईश्वरः प्रतिपादितो दृश्यते । तथा च कुत्रचित् जीवपरमात्मनो भेदः कुत्रचित् भेदाभेदः कुत्रचित् भेदोऽपि स्वीकृतो वर्तते ।

ईश्वरविषयकस्य विचारस्य निष्कर्षो वर्तते यत् – न्यायवैशिषिकयोः प्रतिपादित ईश्वरः संसारस्य कार्यमात्रस्य वा निमित्तकारणं भवति । स च जगतः कर्ता भवति । वेदस्य कर्तृत्वेन च ईश्वरः प्रतिपादितो दृश्यते । तेन च वेदाः प्रमाणानि एव । अनेन मीमांसादर्शनप्रतिपादितानां वेदानामनादित्वमपि खण्डितम् । न्यायवैशेषिकयोः जगतः सृष्टिं तस्य संहारञ्च ईश्वरः करोति । अनेन जगन्नित्यमस्तीति सिद्धान्तः निरस्त एव । दर्शनेऽस्मिन् ज्ञानाश्रयत्वेन ईश्वरः प्रतिपादितो दृश्यते । तेन बौद्धस्य अद्वैतस्य च विज्ञानमेवात्मा इति मतमपि निरस्तम् । न्यायदर्शने ईश्वरस्य स्वरूपं योगदर्शनेन सह कतिपयांशे साम्यं दृश्यते । न्यायवैशेषिकयोः ईश्वरः ज्ञानेच्छापृथक्त्वादीनां गुणानामाश्रयो भवतीति प्रतिपादितो वर्तते । तेन च ज्ञायते अस्मिन् दर्शने ईश्वरः सगुणो भवतीति । गुणाश्रयत्वेन ईश्वरः प्रतिपादितो वर्तते । परन्तु ईश्वरे कति गुणाः वर्तन्ते इति न्यायदर्शनस्य आचार्येषु मतभेदोऽपि स्पटतया दृश्यते । न्यायदर्शने विशेषते जगतः कारणत्वेन परमाणवः स्वीकृताः सन्ति । तथा च अस्मिन् मते ईश्वरः सर्वज्ञो भवति । सर्वज्ञः ईश्वरः अत्र न स्वीक्रियते चेत् न्यायदर्शनस्य परमाणुवादः खण्डितो भवति । यतो हि – परमाणु अतिसूक्ष्म अतीन्द्रियश्च । जडपदार्थो भवति । तत्र चैतन्याभावात् कार्यारम्भः स्वयं भवितुं न शक्नोति । अतः परमाणुषु क्रियासञ्चालनाय कश्चन सर्वविद् स्वीकर्तव्यो भवति । सः सर्वविद् ईश्वरो वर्तते, स एव सर्वज्ञः भवति । तेनैव परमाणुषु किया: समुत्पाद्यते । न्यायदर्शनं वैदिकदर्शनमस्ति । वेदप्रतिपाद्यरूपेण एव ईश्वरः अत्रापि प्राचुर्येण प्रतिपादितो वर्तते । वेदे येन स्वरूपेण प्रयोजनेन वा ईश्वरः प्रतिपाद्यते तेनैव स्वरूपेण न्यायदर्शने प्रतिपदादितो दृश्यते । न्यायदर्शने ईश्वरस्य सिद्धिः अनुमानप्रमाणेन कृतम् । अनुमानप्रमाणानन्तरं शब्दप्रमाणद्वाराऽपि तस्य सिद्धिः कृतो वर्तते । योगिनां च तत्र प्रत्यक्षणैव ईश्वरज्ञानं भवतीति । परन्तु तत् न सर्वेषाम् । अपितु अतः एतावता

ज्ञायते यत् प्रमाणद्वयोः ईश्वरसाधने विशेषग्रहणं दर्शनेऽस्मिन् कृतम् । मम चास्य शोधालेखस्य निष्कर्षो वर्तते यत्, ज्ञानाश्रयत्वम्, सर्वज्ञत्वम्, सकर्तृकत्वादिकादयः ईश्वरस्य स्वरूपमस्ति चेत् प्रत्यक्षानुमानशब्दप्रमाणादिभिश्च तस्य सिद्धिः क्रियत इति ।

## सन्दर्भसामाग्रीसूचिः

अन्नम्भट्टः (ई.२००४), *तर्कसंग्रहः,* (तृ.सं.), (व्या.श्रीकृष्णवल्लभाचार्यः), व्यास प्रकाशन ।

ठक्कुरः, अनन्तलालः (ई.१९९७), *न्यायभाष्यवार्तिकम्,* भारतीयदार्शनिकानुसन्धानपरिषत् ।

त्रिपाठी, रमाशङ्कर (२०५७), *भारतीय दर्शन का परिशीलन,* भारतीय विद्या संस्थान।

मुसलगाँवकर, गजाननशास्त्री (ई.२००३), *न्यायसिद्धान्तमुक्तावली,* चौखम्बा सुरभारती प्रकाशन।

योगीन्द्रानन्दः (ई. २००४), *न्यायभूषणम्,* (पुनर्मुद्रित संस्करण) चौखम्बा विद्याभवन ।

शास्त्री, ढुण्डिराजः (२०४७), *न्यायदर्शनम्,* चौखम्बा संस्कृतसंस्थान।

.... (२०६८), *वैशेषिकदर्शन प्रशस्तपादभाष्य* (पुनर्मुद्रित), चौखम्बा संस्कृतसंस्थान ।

शास्त्री, वासुदेवः (ई.२००३), ईशाद्यष्टोत्तरशतोपनिषदः, राष्ट्रियसंस्कृतसंस्थानम् ।

शुक्लः, सूर्यनारायणः (१९९२), *न्यायमञ्जरी,* (व्या.जयकृष्णहरिदासगुप्तः), चौखम्बासंस्कृतसिरिज ।

श्रीवास्तव, वीना, (ई.१९८२), *भारतीय दर्शन में ईश्वर विचार,* काशी हिन्दु विश्वविद्यालय ।

श्रीपादशास्त्री (ई.१९९३), *द्वादशदर्शनसोपानावलिः,* गुड कम्पेनियन्स ।